CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

729

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः ॐनमःपितृभ्यः पितरऊचुः अस्माकंपतनंवत्सभवतश्चाप्ययोग
तिः नूनंभाविभवित्रीचनाभिनन्दतेवचः मार्कण्डेयउ· इत्युक्तापितरस्तस्यपश्यतोमुनि
सत्तम बभूवुःसहसादृश्यादीपावातहतारव सतेनपितृवाक्येनभृशमुद्विग्नमानसः कृ
त्वाभिलाषीविप्रर्षिःपरिवभ्रामेदिनीम् कृत्वामतिंमहतीमतीवोद्विग्नमानसः किंकरो मिकगच्छामिकृत्यंमेदारसङ्ग्रहः कि
ग्रंभवेन्मेपितृणांममचाप्युपकारकः इतिचिन्तयतस्तस्यमतिर्जातामहात्मनः तपसाराध
याम्येनंब्रह्माणंकमलोद्भवम् ततोवर्षशतं१०० दिव्यंतपस्तेपेसधर्मतः३६००० आराधना
यचतस्यपरंनियममास्थितः ततःसंदर्शयामासब्रह्मालोकपितामहः उवाचचप्रसन्नोस्मी
त्युच्यतामभिवाञ्छितम् ततोःसौप्रतिपत्याब्रह्माणंजगतीगतिम् पितृणांवचनात्तेन
यत्कर्तुमभिवाञ्छितम् ततःप्रोवाचतंब्रह्माजगतोहितकृद्गुरुः प्रजोपतिस्त्वंभवितास्वपृ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ब्राह्मणाप्रजाः सृष्टाप्रजाःसुताश्चिप्रसुत्वाघस्रियास्तथा कृत्वाश्रियंकुरांस्त्वंन
तःसिद्धिमवाप्स्यसि सत्वंयथोक्तंपितृभिःकुरुदारपरिग्रहं ब्रह्मचेमनभिध्यायश्रियंतो
षितृपूजनम् तएवतुष्टाःपितरःप्रदास्यन्तिनवेप्सितम् पत्नींसुतांश्चैतुष्टाःश्रिनदधुः सं
श्रिन्दधुःपितामहाः॥ मार्कण्डेयउवाच इत्यृषिवचनंश्रुत्वाब्रह्मणोब्रह्मनः
नघाविधिंकुशलिनेचकारपितृतर्पणम् तुष्टावचपितृन्विप्रस्तैरभिश्रावृतः ए
कायःप्रयतोभूत्वाभक्तिनम्रात्मकोऽब्रवीत् रुचिरुवाच नमस्येहंपितृन्भक्त्यादेवस्य
धिदेवतम् देवैरपिहितर्प्यन्तेयेश्राद्धेषुस्वधोनरैः नमस्येहंपितृन्श्राद्धेयेतर्प्यन्तेमहर्षि
भिः श्राद्धैर्नानाविधैर्भक्त्यासदाभक्तिमतीक्षुभिः नमस्येहंपितृन्स्वर्गसिद्धाःसन्तर्पयन्ति
यान् श्राद्धेषुदिव्यैःसकलैस्तथारसैरनुत्तमैः नमस्येहंपितृन्भक्त्यायेर्चन्तेगुह्यकैर्दि
व्यमर्त्यैरर्चन्तेभुवियेसदा श्राद्धेषुश्राद्धमाप्नोतिपुष्टिप्रदायिनः नमस्येहंपितृन्विप्रैरर्चन्तेयेसदाभुवि वाञ्छितामीप्ट

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रा-स्तो- लभायप्राजापत्यप्रदायिनः नमस्येहंपितॄन्यमेनर्व्यन्तेरण्यवासिभिः वन्येःश्यामकुलता
२ हरैस्तथोपनिर्धृतकल्मषैः नमस्येहंपितॄन्विप्रैर्नैष्ठिकव्रतचारिभिः येसंयतात्मभिर्नित्यं
सन्तर्प्यन्तेसमाधिभिः नमस्येहंपितॄन्श्राद्धेरन्नन्यास्तर्पयन्तियान् कव्यैरग्नौविधिविध
ध्दोक्तैरक्षयफलप्रदान् नमस्येहंपितॄन्वैश्यैरर्च्यन्तेभुविये सदा स्वकर्मनिरतैर्नित्यंपुष्पभू
तवारिभिः नमस्येहंपितॄन्श्राद्धेयैरिहसिक्तिनः सन्तर्प्यन्तेजगत्यत्रनान्यारक्षन्तिताः
सुकालिनः नमस्येहंपितॄन्श्राद्धेपातालेयैरसासुरैः सन्तर्प्यन्तेस्वधाहारास्त्यक्तदंभमदैः
सदा नमस्येहंपितॄन्श्राद्धेयैरर्च्यन्तेरसातले भोगैरग्नौविधिविधानोक्तैःकामानभीप्सुभिः
नमस्येहंपितॄन्श्राद्धेसर्वैःसन्तर्पितान्सदा तत्रैवविधिवन्मन्त्रैर्भोगसम्पत्समन्वितैः पितॄ
नमस्येनिवसन्तिसाक्षाद्येदेवलोकेथमहीतलेवा तथान्तरिक्षेसुरदिक्ष्वशेसम्पू
ज्यन्तेमयोपनीतम् पितॄन्नमस्येपरमाणुभूतायेवैविमानेनिवसन्त्यमूर्तीः यजन्तियो
गस्तमलैर्मनोभिर्योगीश्वराःकोथविमुक्तिहेतून् पितॄन्नमस्येदिविचामूर्तीःस्वधाभुजःक्र

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

न्यपत्यानिसन्ध्यो प्रदानशक्तःसकलेप्सितानांविमुक्तिदायेनभिसन्धितेषु तप्यन्तुतेस्मि
न्पितरःसमस्ताइच्छावतांयेप्रदिशन्तिकामान् सुरत्वमिन्द्रत्वमतोधिकंवास्वालजा
न्क्षेमबलंदधन्ति सूर्यस्ययेरश्मिषुचन्द्रबिम्बेशुक्लेविमानेचसदावसन्ति तप्यन्तुते
स्मिन्पितरोन्नतोयैर्गन्धादिनातृप्तिमितोव्रजन्तु येषांहुतेस्तोयविधानतृप्तिर्भुञ्जन्तेवि
प्रशरीरसंस्थाः येपिण्डदानेनमुदंप्रयान्तितप्यन्तुतेस्मिन्पितरोन्नतोयैः येयज्ञभागेन
सुरैरभीष्टैःकृपेस्थितैर्दैत्यमहोरगैश्च कलेनशकुनमहर्षिवर्यैसंदीपितास्तेचमुदंप्रया
न्तु कव्यान्यशेषाणिचयान्यभीष्टान्यतीवतेषाममरात्मनांनाम् तेषांचसान्निध्यमिहा
स्तुपुष्पगन्धांबुभोज्येषुमयाहृतेषु दिनेदिनेयेप्रतिगृह्णतेचौमांसान्तरुत्थायुविये
धूसु येवत्सरान्तेभुदयेचदृष्टाःप्रयान्तुतेमेपितरोन्नतश्रियं दृष्ट्वादिजानांकुलदन्तुभा
सोयेक्षत्रियाणांचनगार्हवर्णाः तथाविशांयेकनकावदातानीलद्युतिभाःशूद्रजनस्यये
च तेस्मिन्समस्तामम पुण्यगन्धधूपादितोयान्नविवेदनेन तथास्तिरेमेनचयान्तु ते

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

हिंसदपितभ्यः प्रणतोस्मितेभ्यः येदेवशत्रवित्यमितृप्तिहेतोरश्नन्तिकव्यानिपुरा कृतानि
तत्पाश्चयेभूतिस्तोभवन्तितप्यन्तुतेस्मिन्प्रणतोस्मितेभ्यः रक्षांसिभूतान्यसुरांस्तथो
ग्रान्निर्नीशयन्तस्त्वशिवंप्रजानाम् आघाःसुराणामनरेशपूज्यास्तप्यन्तुतेस्मिन्प्रण
तोस्मितेभ्यः अग्निष्वात्ताबर्हिषदआज्यपाःसोमपास्तथा प्रजन्तुतृप्तिभ्रातेऽस्मित्यि
तरस्तर्पितामया अग्निष्वात्ताःपितृगणाःप्राचीरक्षन्तुमेदिशम् तथाबर्हिषदःपान्तु
याम्यांयेपितरःस्थिताः प्रतीचीमाज्यपास्तद्वदुदीचीमपिसोमपाः ऊर्ध्वंतथायेमार
क्षेत्कव्यवाडनलोप्यधः रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः सर्वतश्चाधिपत्ये
नांयमोरक्षांसूरोनुमे विश्वेविश्वभुगाराध्योधर्मोधन्यःशुभाननः भूतिदोभूतिभद्भूतिः
पितृगणेवेगणानव कल्याणकल्पदःकनीकल्यःकल्यान्तराश्रयः कल्यतोहेतुरनघः
बर्हिष्येषांगणाःस्मृताः वरोवरेण्योवरदस्तुष्टिदःपुष्टिदस्तथा विश्वपासतथाधा
तासपृचैतेगणाःस्मृताः महान्महात्मामहितोमहिमावान्महाबलः गणाःपञ्चैतथै

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वैतेपितृगणायापनाशनाः सुखदोधनदश्चान्योधर्मदोन्यश्चभूमिदः पितृगणंकथ्यते
चैतेनभागणंचनृपयम् एकविंशतिपितृगणायेभ्योधूमरिक्तंजगत् तेमेत्रप्तपास्तु
प्यन्तुकुर्वन्तुहसहितम् मार्कण्डेयउवाच एवंस्तुवतस्तस्यतेजसोराशिरुत्थि
तः प्रादुर्बभूवसहसागगनव्यापिकरकः तदृष्टासमस्तेजःसमाक्षीघस्थितंजग
त् जानुभ्यामवनीगत्वारुचिस्तोत्रमिदंजगौ अर्चितानाममूर्तीनांपितृणांदीप्ततेज
साम् नमस्यामिसदातेषांध्यानिनांयोगचक्षुषाम् इन्द्रादीनांजनेतारोदक्षमारीच
योस्तथा सप्तर्षीणांतथान्येषांतान्नमस्यामिकामदान् मन्वादीनांप्रनेतारःसूर्यच
न्द्रमसोस्तथा तान्नमस्याम्यहंसर्वोन्पितृनप्योषधीषुच नक्षत्राणांग्रहाणांचवायू
न्योर्नभसस्तथा द्यावापृथिव्योश्चतथानमस्यामिकृताञ्जलिः प्रजापतेःकश्यपाय
सोमायवरुणायच योगेश्वरेभ्यश्चसदानमस्यामिकृताञ्जलिः नमोगणेभ्यःसप्तभ्यस्त
थालोकेषुसप्तसु स्वयंभुवेनमस्यामिब्रह्मणेयोगचक्षुषे सोमाधाराःपितृगणायोगमूर्ति

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

धरणीते नमस्यामितनः सोमपितृगणामस्तु अग्निरूपांस्तथान्यान्नमस्यामिपितृन
न् अग्नीषोममयंविश्वंयतएतदशेषतः येनूनेऽग्नियतोयस्मात्सर्वाग्निस्वरूपिणः अतस्त्व
रूपिणश्चैवतथान्यान्नमस्यहंपितॄन्योगिनोयोगिभ्यःपितृभ्योयतमानसः नमोन
मोनमस्तेप्रसीदन्तुस्वधाभुजः मार्कण्डेयउवाच एवंस्तुतास्तदातेनतेजसोमुनिसत्तम
निश्चक्रमुस्तेपितरोभास्वयंतोदिशोदश विदर्भितेचयत्नेनपुष्पगन्धानुलेपनम् नदूषिता
नपसातान्ददर्शपुरतःस्थितान् प्रणिपत्यपुनर्भक्त्यापुनरेवकृताञ्जलिः नमस्त्वेनमस्तु
भ्यमित्याहपुनर्मुनिः ततःप्रसन्नाःपितरस्तमूचुर्मुनिसत्तमम् वरंवृणीष्वमुनिसत्तमेप्सितं
मानसन्धरः सोपसर्गमुवाचेदं हेब्रह्मण्यमम [illegible]
सोहंपत्नीमभीप्सामिधन्यांदिव्यांप्रजावतीम् पितरऊचुः अजेयसुतःपत्नीतेभविष्यतिम
नोरमा तस्यांचपुत्रोभविताभवतोमुनिसत्तम मन्वन्तरंपितोषीमान्त्वत्तोलोकोपलक्षि
तः रूचेरोऽइतिख्यातिंप्रयास्यतिजगत्त्रये तस्यापिचत्रयःपुत्रामहाबलपराक्रमाः भ
विष्यन्तिमतिमानःपृथिवीपरिपालकाः तंचप्रजापतिर्भूत्वाप्रजाःसृष्ट्वाचतुर्विधाः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

क्षीणपिक्षरोधर्मज्ञस्तानःसिद्धिमवाप्स्यसि स्तोत्रेणानेन नरोयोस्मांस्तोष्यतिभ
क्तितः तस्यतुष्टावयंभोगान्दास्यामोज्ञानमुत्तमम् श्रीरारोग्यमर्थंचपुत्रपौत्रादि
कंतथा वाञ्छितंसततंस्तुत्याःस्तोत्रेणानेनवैवयम् आकृष्टयन्तंभक्त्याअस्म
त्प्रीतिकरंस्तवम् पठिष्यतिद्विजाग्र्याणांभुञ्जानानांपुरःस्थितः स्तोत्रश्रवणसं
प्रीत्यासन्निधानेपरेऽहते अस्माभिरक्षयश्चाऽहतुविष्यत्यसंशयः यएष्यश्रोत्रि
यंश्राद्धेयएष्युपहतेभवेत् अन्योपानविनेनयद्विधाऽहतमन्यथा अश्राद्धार्हस्वर
नैरुपहारैस्तथाऽहतम् अकालेव्यथकादेशेविधिहीनमथापिवा अश्रद्धयाचपुरुष
दैभक्त्याश्रित्यवाऽहतम् अस्माकंतत्पृथेश्राद्धंतथाप्येतदुदीरितम् यत्रैतत्पठ्यते
श्राद्धेस्तोत्रमस्मत्सुखावहम् अस्माकंजायतेतृप्तिस्तत्रद्वादशवार्षिकी हेमन्तेद्वाद
शात्तितृप्तिनतत्प्रयच्छति शिशिरेद्विगुणात्तितृप्तिश्राद्धेइदंश्रुतम् वसन्तेषो
डशसमास्तृप्तेश्राद्धकर्मणि ग्रीष्मेचषोडशैवैतत्पठितंतृप्तिकारकम् विकालेऽहते

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

५ श्राद्धस्तोत्रेणानेनसाधिते वर्षासुत्रिरस्माकमक्षयानायनेरुचे शरत्कालेपिपठितंश्रा
द्धकालेप्रयच्छति अस्माकमेतत्पुरुषैस्तृप्तिंपश्चदशाब्दिकीम् यस्मिन्नरेपिलिखित
मेतन्निष्ठतिनित्यदा सन्निधानेकृतेतृप्तिस्तवास्माकंभविष्यति यस्मादेतत्त्वयाश्राद्धे नि
प्राणंभुञ्जतांपुरः श्रवणीयंमहाभाग अस्माकंप्रीतिहेतुकम् ७५ इतिश्रीमार्कण्डेयपु
राणेरौच्यमन्वन्तरेरुचिस्तवनामाष्टाशीतितमोध्यायः ८८ मार्कण्डेयउ॰ ततस्तस्मान्व
दीमध्यात्समुत्तस्थौमनोरमा अब्रूचानामतन्वङ्गीतत्समीपवरस्त्रियः साचोवाच
महाभागानेरुचिंसुमधुराक्षरम् शृण्वतांवनितासर्वेःप्रब्रूचावैवरस्त्रियः अतीवरूपिणी
कन्यामत्सुतातपतोवरा आतावरूपपुत्रेणपुष्करेणमहात्मना तोयहस्तेनयादोभार्या
र्थेवरवर्णिनी मनुश्रेष्ठमनिस्तस्यांसमुत्पत्स्यतेसुतः सावलेयउ॰ तथेतितेतस्यां
कान्तस्माद्योद्वयुष्मतो ऽजायतनरःकन्यामालिनीनामनामतः नद्याश्चपुलिनेत
स्मिन्सरुचिर्मुनिसत्तमः अन्याश्चपार्थिवेन्द्रेभ्यस्तथामान्यमहर्षीन् तस्यांतस्य

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सुतोऽतेमहावीर्योमहात्मानिः रैव्योभवत्पितुर्नाम्नारम्यातोत्रवसुधातले तस्यमन्वन्त
रेदेवास्तथासप्तर्षयश्चये तनयाश्चत्रपाश्चैवतेसम्यक्पूजितास्तव धर्मरद्धिस्तथारो
ग्यधनधान्यसुतोद्भवः नृणांभवत्यसन्दिग्धमस्मिन्मन्वन्तरेभुते पितस्तवंतथा
श्रुत्वापितृणांचतथागणान् सर्वान्पूजयानवाप्नोतित्प्रसादान्नरोभुने ९० इतिश्री
मार्कण्डेयपुराणेरौच्यमन्वन्तरेरौच्यमनूत्पत्तिर्नामएकोननवतितमोध्यायः ९९

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi